A REFORMED SERIES OF SANSKRIT READERS

# READER II.

By Pandit K. L. V. Sastri.

# ॥ संस्कृताद्वितीयादर्शः ॥



PUBLISHED BY
R. SUBRAHMANYA VADHYAR,
BOOKSELLER & PUBLISHER,
KALPATHI—PALGHAT.

1928

ll Rights Reserved.)

[मूल्यं ८ आणकाः

T38
S79

X A10

S.N. ... ORIENTAL ... LIBRARY

A Reformed Series of Sanskrit Readers.

# READER II.

BY

Pandit K. L. V. Sastri,
*Mahopadhyaya, Siromani & Proficient in Indo-European Philology.*

## ॥ संस्कृतद्वितीयादर्शः ॥

महोपाध्याय—शिरोमणिबिरुदभाजा
के. एल्. व्यासरायशास्त्रिणा
विरचितः ।

DHARMARAM COLLEGE LIBRARY, BANGALORE
4466

---

PUBLISHED BY
R. SUBRAHMANYA VADHYAR
BOOK-SELLER & PUBLISHER,
KALPATHI-PALGHAT.

P. 25

---

T 38
S 79

1928.

*All Rights Reserved.*

SRIRANGAM :

SRI VANI VILAS PRESS.

CANCELLED

## PUBLISHER'S NOTE.

While gratefully acknowledging with pleasure the kind patronage and warm support extended by the various Educational Authorities and Heads of Institutions to the Infant Reader and Reader I of the Reformed Series of Sanskrit Readers, we have great pleasure in publishing this the Second Reader of the same series.

It will be noted that in this Reader special care has been taken to maintain the best feautures of the previous Readers and at the same time to greatly improve the illustrations and general get-up. Hence, we trust that this will also receive the warm support and appreciation of the Educational World.

DHARMARAM COLLEGE LIBRARY, BANGALORE.

# अनुक्रमणिका CONTENTS.


| पाठः | | पृष्ठम् |
|---|---|---|
| १ | श्रीकृष्णः | १ |
| २ | सिंहः | ३ |
| ३ | संहतिः | ५ |
| | लोकोक्तयः | ६ |
| ४ | नालिकेरः | ७ |
| ५ | परोपकारः | ९ |
| ६ | कमलम् | ११ |
| ७ | नहुषः | १३ |
| ८ | पक्षिणः | १४ |
| ९ | कीलोत्पाटी वानरः | १६ |
| १० | धौम्य आरुणिश्च | १८ |
| ११ | लोभी मत्सरी च | २० |
| १२ | काको जम्बुकश्च | २१ |
| १३ | कदली | २४ |
| १४ | हंसः | २७ |
| १५ | न्यायस्थानम् | २८ |
| १६ | उष्ट्रः | ३० |

| | | |
|---|---|---|
| १७ | काको हंसश्च | ३२ |
| १८ | खल: | ३४ |
| १९ | गृहम् | ३५ |
| २० | आहार: | ३७ |
| २१ | समुद्र: प्रवहणं च | ३९ |
| २२ | शकटम् | ४१ |
| २३ | दैवं पुरुषकारश्च | ४४ |
| २४ | त्रिशङ्कु: | ४६ |
| २५ | रामो भीम: श्यामश्च | ४९ |
| २६ | गृध्रो मार्जारश्च | ५३ |
| २७ | त्रयो धूर्ता: | ५६ |
| २८ | हिमालय: | ५९ |
| २९ | माधव: | ६१ |
| ३० | अनन्तपुरमहाराज: | ६३ |
| ३१ | धीरश्चोर: | ६५ |
| ३२ | चाटुश्लोका: | ६७ |
| ३३ | वाराणसी | ६८ |
| ३४ | श्रीशङ्कराचार्य: | ७१ |
| ३५ | सुभाषितावलि: | ७४ |

॥ श्रीः ॥

# ॥ संस्कृताद्वितीयादर्शः ॥



## १. श्रीकृष्णः ।


जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गः
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ १ ॥

हे देव हे दयित हे जगदेकबन्धो
हे कृष्ण हे चपल हे करुणैकसिन्धो ।
हे नाथ हे रमण हे नयनाभिराम
हा हा कदा नु भवितासि पदं दृशोर्मे ॥ २ ॥

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन् नमाधोक्षजम् ॥

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलास्तु भगवन् हे कृष्ण तुभ्यं नमः ॥



## २. सिंहः ।

अपि युष्माभिः कुत्रापि सिंहो दृष्टः? न दृष्टः। पश्यत, अत्रास्ति सिंहस्य चित्रम्। सिंहो न ग्राम्यः किन्तु वन्यो मृगः। अरण्यवासिनां शार्दूलसूकरादीनां मध्ये सिंहः शूरो मानी गम्भीरो बलिष्ठश्च। अतः स 'मृगराजः' इति प्रथां भजते।

सिंहानां शिरसि कण्ठे च धूसराः केसराः सन्ति। अतस्ते केसरिण इत्यभिधीयन्ते। तेषामास्यमतीव विस्तृतम्। अतस्ते पञ्चास्या इत्याख्यायन्ते। तेषामक्षिणी पिङ्गले भासुरे च। सिंहेष्वातिदीर्घाः खरा नखराः परुषा दन्ताश्चेश्वरेण सृष्टाः।

केसरिणो न सर्वत्र देशेषु निवसन्ति। आफ्रिकाखण्डे ते प्राचुर्येणोपलभ्यन्ते। भारतखण्डे तु ते पुरा शुतुद्याः सिन्धोश्च मध्यवर्तिनि सिकतारण्ये न्यवसन्। इदानीं तु ते गुर्जरदेशस्य दक्षिणतः स्थितेषु घोरारण्येषु वसन्ति।

मृगेन्द्राः प्राधान्येन मत्तेभानां मूर्धानमधिरुह्य तेषां गण्डौ भित्वा तत्रत्यं मांसं भक्षयन्ति। एवं वने स्थितानितरान् मृगानपि ते निघ्नन्ति। यदा ते परितश्चरन्तो न मृगान् विन्दन्ति तदा तारं गर्जन्ति। तद्गर्जनं श्रुत्वा सर्वे मृगाः सभयमितस्ततो धावन्ति। तदा सिंहाः सत्वरं तेषामुपरि निपत्य तान् विध्यन्ति। कदाचिदाहारमलभमानः सिंहः सर्वावयवान् स्तब्धीकृत्य भूमौ शेते। तथा शयानं तं दृष्ट्वा मृगास्तं मृतं मन्यमानास्तस्यान्तिके चरन्ति। मृगमागतं दृष्ट्वा सिंहो

झडित्युत्थाय तं गृह्णाति । इत्थं सिंहाः स्वबुद्धि-कौशलेन जीविकां वर्तयन्ति ।

## ३. संहतिः ।

बालाः शृणुत— कस्यापि वणिजः सकाशे चत्वारो वृषभा अवर्तन्त । प्रत्यहं प्रचाराय विसृष्टास्ते क्वचिदे-कत्रैव देशे स्वच्छन्दं तृणानि चरन्तः पीवराङ्गा अभू-वन् । कश्चिद्वृद्धो व्याघ्रस्तान् हन्तुमुदयुङ्क्त । अथापि ते-ष्वेकस्योपरि समुत्प्लवनेऽन्ये त्रयः समभ्येत्य निशिता-भ्यां शृङ्गाभ्यामात्मानमालिखेयुरिति भीत्या भग्नाशो-ऽवर्तत ।

एकस्मिन् दिवसे चत्वारोऽपि ते वृषभाः केनापि हेतुना मिथः कलहायमानाः प्रचाराय भिन्नभिन्नां दिशं जग्मुः । अथ कालं प्रतीक्षमाणः स्थितो द्वीपी लब्धाव-काशस्तानेकैकशो गृहीत्वानायासेन व्यापाद्याभक्षयत् ।

पश्यत, ऐकमत्यस्य भङ्गेन कीदृशी विपत्तिः समुप-नता वृषभाणाम्! अत एवोच्यते संहतिः कार्यसाधि-

केति । यद्येवं भ्रातरोऽप्यैकमत्ये वर्तेरंस्तर्हि ते सम्पदं प्राप्नुयुः, अन्यथा विपदम् । अत एवाहुः पाण्डवाः—

परस्परं विवादे हि वयं पञ्च शतं च ते ।
अन्यैः सह विवादे तु वयं पञ्चोत्तरं शतम् ॥

---

## लोकोक्तयः ।

---

ननु प्रवातेऽपि निष्कम्पा गिरयः ।
अन्तःपुरगतमापणे घुष्यते ।
गण्डस्योपरि पिटकः संवृत्तः ।
मुण्डितमुण्डो नक्षत्राणि पृच्छसि ।
पत्तने सति ग्रामे रत्नपरीक्षा ।
जलं जलसंपृक्तं महाजलाय भवति ।
अहो खल्वन्धैरन्धस्य यष्टिः प्रदीयते ।
किं हीनकुसुमं सहकारं मधुकराः सेवन्ते ।
न खलु क्षुधितोऽपि शार्दूलः शाद्वलमत्ति ।
न हि भवति मशको मातङ्गस्य प्रतिस्पर्धी ।
वृश्चिकभयात् पलायमानैराशीविषमुखे पतितम् ।

---



## ४. नालिकेरः।

वृक्षोऽयं नालिकेर इति नारिकेल इति नारीकेर इति नारीकेल इति नाडिकेर इति केर इति चैवं बहुधाभिधीयते। केरोऽयं केरलेषु बाहुल्येन प्ररोहति। अत एवास्य देशस्य केरलव्यपदेशः ।

नालिकेराः समुद्राणामासन्नेषु सिकतिलेषु प्रदेशेषु प्ररोप्यमाणाः पञ्चषैरब्दैः फलन्ति । बाल्ये नालिकेराणां द्वित्राणि वर्षाणि यावज्जलसेचनमावश्यकम् । ततः परं ते स्वयमेव पादैर्भूतलाज्जलमाकृष्य पिबन्ति । क्रमशः प्रवृद्धास्ते प्रथमवयसि पीतं तोयं स्मरन्त इवामृतकल्पमुदकं शिरसि वहन्तो मनुष्याणां प्रत्युपकारमाचरन्ति ।

नालिकेरस्य सर्वमङ्गं सप्रयोजनं दृश्यते । केरफलसारो न केवलं विविधेभ्यो व्यञ्जनेभ्यः परमुपयुज्यते, किन्तु तमातपे शोषयित्वा यन्त्रे निधाय तस्मात् तैलमपि गृह्यते जनैः । तत्रावशिष्यमाणः कल्कः पिण्याकम् । तच्च पिण्याकं गोभ्यो रोचते । केचित्तु तेन विविधान् भक्ष्यविशेषान् कुर्वन्ति ।

नालिकेरः शाखारहितो वृक्षः । चित्रमवलोक्यताम्—दृश्यते तत्र दीर्घदीर्घो नालिकेरकाण्डः । काण्डस्य शिरस्युपद्वादशानि पत्राण्यवेक्ष्यन्ते । केरपत्रैर्गृहपटलादिकं निर्मीयते । तस्य काण्डोऽपि पनसादिवद्गृहदारुत्वेनोपयुज्यते । फलत्वचा रज्जवः क्रियन्ते, आस्तरणान्यप्यूयन्ते ।

अपरिणतं नालिकेरं लाङ्गलीत्युच्यते। लाङ्गलीजलं निदाघकाले पीतं स्वादु हितं च भवति। मद्यकाराः पल्लवकाण्डात् स्यन्दमानं रसं गृहीत्वा मद्यं सम्पादयन्ति। तत् केचित् पिबन्ति। किन्तु तत् पीयमानमुन्मादं जनयति। तस्मात् तत् सर्वथा न पेयम्।

न सुरां पिबेत्। न कलञ्जं भक्षयेत्॥

---

## ५. परोपकारः।

---

श्रूयतां धर्मसर्वस्वं
यदुक्तं ग्रन्थकोटिषु।
परोपकारः पुण्याय
पापाय परपीडनम्॥ १॥

परोपकारः कर्तव्यः
प्राणैरपि धनैरपि।
परोपकारजं पुण्यं
न स्यात् क्रतुशतैरपि॥ २॥


परोपकारशून्यस्य
　　धिङ्मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां
　　चर्माप्युपकरिष्यति ॥ ३ ॥

परोपकाराय फलन्ति वृक्षाः
　　परोपकाराय वहन्ति नद्यः ।
परोपकाराय भवन्ति गावः
　　परोपकारार्थमिदं शरीरम् ॥ ४ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
　　दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां
　　परोपकारेण न चन्दनेन ॥ ५ ॥

पिबन्ति नद्यः स्वयमेव नाम्भः
　　स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यान्यपि वारिवाहाः
　　परोपकाराय सतां विभूतयः ॥ ६ ॥

---



## ६. कमलम् ।

कमलानि सरसि पङ्के जायन्ते । अतस्तानि सरसिजानि पङ्कजान्यम्भोजानीत्यादिभिः शब्दैर्व्यवह्रियन्ते । कमलेषु नानाजातयः सन्ति । तत्र नीलमम्भोरुहमुत्पलमिति रक्तं कोकनदमिति सितं पुण्डरीकमिति चाख्यायते ।

कुवलयान्यपि सरसि पङ्क एव जायन्ते। अथापि तेषां न पङ्कजादिशब्दैर्व्यवहारः। कुवलयानि कमलाकाराण्येव। किन्तु तेषु सौगन्ध्यं नास्ति।

चित्रं पश्य, कानिचित् कुसुमानि मुकुलितानि कानिचित् विकसितानि च दृश्यन्ते। कुसुमस्याधस्ताल्लम्बमानः प्रकाण्डो मृणालम्। मृणालस्यान्तर्भागे च्छिद्राणि तन्तवश्च वर्तन्ते।

कमलसरांसि कमलिन्य इति कुमुदसरांसि कुमुदिन्य इति चोच्यन्ते। कमलिन्यः सूर्यस्योदये कुमुदिन्यश्चन्द्रस्योदये च विकसन्ति। अतः सूर्यः कमलिनीनायक इति चन्द्रः कुमुदिनीनायक इति चाभिधीयते।

कमलानां मध्यभागे किञ्जल्काः सन्ति। तेषु सुगन्धयः परागा विद्यन्ते। मधुकराः प्राधान्येन कमलेभ्यो मधु सञ्चिन्वन्ति।

यद्यपि मल्लिकादीनि कुसुमानि कमलापेक्षया सुगन्धितराणि तथापि तेषामेतावत् सौन्दर्यं नास्ति। अत एव पद्मं पद्मायाः सद्म निगद्यते।

# ७. नहुषः ।

पुरा किल चन्द्रवंशे पुरूरवसः पौत्र आयुषः पुत्रः शीलवान् मतिमान् धार्मिकश्च नहुषो नाम नरपतिरासीत् । स च महता विभवेन शतमश्वमेधानाहृत्य द्वितीयः शतमन्युरिव व्यराजत ।

अत्रान्तरे वृत्रं हत्वा पापमवाप्य स्वपदात् प्रच्युतो वासवस्तत्प्रायश्चित्ततया कञ्चित्कालमन्तर्जले न्यलीयत । तस्मिन् व्यतिकरे नहुषोऽयं देवराजपदवीमधिरोपितः । तत्पदमधिरूढमात्र एव स राजा श्रीमदान्धः सर्वमेव लोकं तृणायामन्यत ।

अथ स इन्द्राणीं कामयमानो महताडम्बरेण तस्या वासभवनं गच्छन् सप्तर्षीनाहूय स्वशिबिकावहनायादिदेश । सप्तर्षयश्च तस्य शासनमनुल्लङ्घनीयं ज्ञात्वा शिबिकां वहन्तः कथं कथमपि चेलुः । राजा च तान् सर्वान् पदे पदे स्खलतः परुषवचनैरनिन्दत् । विशेषतश्चेतरैः सह गन्तुमशक्तं ह्रस्वकायमगस्त्यं— कुम्भडिम्भ, सर्प सर्पेत्यधिचिक्षेप ।

तदाकर्ण्य रुष्टस्तपस्वी कुम्भयोनिर्नहुषं सर्पो भवेत्यशपत् । शप्तमात्र एव नहुषो महाकायः काकोदरो भूत्वा शिबिकातः क्षितौ पपात । तस्मादत्युन्नतं पदं प्राप्तो मान्यान् नावमानयेत् ।


---

## ८. पक्षिणः ।

---

पक्षिणां पक्षौ पादौ च स्तः । अतस्ते पक्षाभ्यां व्योम्नि डयितुं पादाभ्यां भूमौ चलितुं च शक्नुवन्ति । यदा ते डयन्ते तदा पक्षौ विकासयन्ति, यदा च क्वचिदुपविशन्ति तदा सङ्कोचयन्ति । कुक्कुटादयः केचिदण्डजाः पक्षवन्तोऽपि सम्यग्डयितुं न प्रभवन्ति । गरुडाः कदाचिदत्यूर्ध्वे नभसि पतन्ति । हंसादयः केचित् पक्षिणो जले चरन्ति ।

पक्षिणो वृक्षशाखासु नीडानि निर्माय तत्र निवसन्ति । नीडानि तृणकणैर्निर्मीयन्ते । आलेख्येऽस्मिन्नेको विहङ्गमः शाखायामुपविष्टः । तस्य सविधे कश्चित्कुलायो दृश्यते । तस्मिन् कुलाये चत्वारः शावकाः सन्ति ।




विहङ्गा अहन्याहाराय चरित्वा सायं स्वनीडमागच्छन्ति । रात्रौ तत्र निद्राय प्रातस्तरां प्रबुध्यन्ते । प्रबुध्य च वृक्षाद्वृक्षमटन्तो मधुरमधुरैः कलकलैर्जनानामानन्दं जनयन्ति। उदिते च भानौ भूय एवाहारार्थं भ्राम्यन्ति । पक्षिणां दन्ताभावात् ते चञ्च्वा भक्ष्याणि खादन्ति । वाग्गुदानां तु दन्ताः सन्ति पक्षौ च स्तः । अथापि ते मृगजातावन्तर्भवन्ति ।


विहगाः फलानि धान्यानि कृमीन् कीटान् वा यथेष्टमाहरन्ति । पारावतः पिकः शुकश्चटकश्च प्राधान्येन धान्यानि फलानि च खादन्ति । गृध्रस्तार्क्ष्यो बक इत्यादयो मांसमप्यश्नन्ति । काको मांसं धान्यं फलं वा भक्षयति । अग्निकणभक्षिणः शिलाभक्षिणश्च केचिद्विहगाः श्रूयन्ते । चातकास्तु केवलं जलदेभ्यः पतितान् जलबिन्दूनाहरन्तो जीवन्तीति कवयो वर्णयन्ति ।

---

## ९. कीलोत्पाटी वानरः ।

अस्ति ब्रह्मारण्यस्य समीपे विरिञ्चिपुरं नाम नगरम् । तत्र शुभदत्तनामा वैश्यः प्रतिवसति । तस्य चिराय सन्ततिर्नासीत् । अतः स धर्मपरो भूत्वा कश्चिद्देवालयं निर्मातुमुपाक्रामत ।

अथ स कारूनाहूय तैर्दारुकर्म कारयामास । एकस्मिन् दिवसे कारवः करपत्रेणैकं स्तम्भं किञ्चिद्दूरं विदार्य द्वयोः खण्डयोर्मध्ये कीलकं निधाय मध्याह्ने




भोजनाय गृहं गताः । तदा तत्र कश्चिद्बलवान् वानरसन्दोहः क्रीडन्नागतः ।

तेषामेको वानरः कालप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वा पादौ च दारुखण्डयोरुपरि निधायोपविष्टः । तदा तस्य पुच्छो दारुखण्डयोरभ्यन्तरे प्रविष्टः ।

ततः परं प्रकृत्या चपलः स वानरो महता यत्नेन तं कीलकमाकृष्टवान् । आकृष्टे च कीलके चूर्णितपुच्छः

स पञ्चत्वं गतः। तस्मादस्माभिर्निष्फले कर्मणि न कदापि प्रवृत्तिर्विधेया।

---



## १०. धौम्य आरुणिश्च।

---

आसीत् कश्चिदृषिर्धौम्यो नाम। तस्य शिष्यास्त्रयो बभूवुः— आरुणिः उपमन्युः वेदश्चेति। स एकदा शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास— 'गच्छ, केदारखण्डं बधान' इति।

स उपाध्यायेन समादिष्ट आरुणिस्तत्र गत्वा तत् केदारखण्डं बद्धुं नाशकत्। स क्लिश्यमानोऽपश्यदुपायं—

'भवतु, एवं करिष्यामि' इति। स तत्र केदारखण्डे संविवेश। शयाने च तथा तस्मिन्नुदकं तस्थौ।

ततः किञ्चिदतीत्योपाध्यायो धौम्यः शिष्यावपृच्छत्— 'क्क आरुणिः पाञ्चाल्यो गतः?' इति। तौ तं प्रत्यूचतुः— 'भगवन्, त्वयैव प्रेषितो गच्छ केदारखण्डं बधानेति'। स एवमुक्तः प्रत्युवाच— 'तर्हि तत्र सर्वे गच्छामो यत्र स गतः' इति। तत्र गत्वोपाध्यायस्तस्याह्वानाय शब्दं चकार— 'भो आरुणे पाञ्चाल्य क्वासि, वत्स एहि' इति।

स तदाकर्ण्यारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायमुपतस्थे। प्रोवाच चैनं— 'अयमस्म्यत्र केदारखण्डे निस्सरमाणमुदकमवारणीयं संरोद्धुं संविष्टः। भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखण्डं भवन्तमुपस्थितः। तदभिवादये भवन्तम्। आज्ञापयतु भवान् कमर्थं करवाणि' इति।

स एवमुक्त उपाध्यायः प्रत्युवाच— 'यस्माद्भवान् केदारखण्डं विदार्योत्थितस्तस्मादुद्दालक एव नाम्ना त्वं भविष्यसि। यस्माच्च मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवा-

प्स्यसि। सर्वे च वेदास्ते प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणि' इति। अथोपाध्यायेनानुगृहीत आरुणिर्गुरुकुलाद्गृहं न्यवर्तत।

---

## ११. लोभी मत्सरी च।

---

आस्तामेकस्मिन् ग्रामे सुन्दसुन्दरनामानौ द्वौ पुरुषौ। तयोः सुन्दोऽतीव लोभी सुन्दरोऽत्यन्तं मत्सरी चासीत्। तावेकदा चराचरगुरुं भगवन्तं परमेश्वरं प्रत्यक्षीकर्तुं क्वचिच्छिवमन्दिरे तपस्तेपाते।

तयोस्तपसा प्रीतो भवानीपतिः सद्य एवाविर्भूय जगाद— 'भोः साहसिकौ, युवयोरनन्यसाधारण्या भक्त्या तुष्टोऽस्मि। अलं भूयसा तपसा। वरं वृणीतम्। यद्याचिष्येथे तद्दास्यामि। परन्तु यः प्रथमं यावद्याचिष्यते स तावल्लभेत। अन्यस्तु तदेव द्विगुणं लप्स्यते' इति।

भगवतो महादेवस्य तद्वचनं श्रुत्वा लोभी सुन्दरः— नाहमादौ वरं प्रार्थयिष्ये। अयं मम सखा भूरि द्रविणं

याचिष्यते । तदेव द्विगुणं मया लभ्येत इति विचिन्त्य स्वयं तूष्णीमास्त ॥

परस्योत्कर्षमसहमानो मत्सरी सुन्दस्तु लोभिनं वञ्चयितुकामः साष्टाङ्गं प्रणिपत्य शिवमभ्यर्थयामास— 'भगवन्, भक्तवत्सल, यदि मयि प्रसन्नोऽसि यदि च मामनुजिघृक्षसि तर्हि ममैकं नयनमुत्पाटय' इति । 'तथास्तु' इति शूलिनोक्ते मत्सरी सद्य एवैकाक्षो जातः। लोभिनस्तु द्वे अप्यक्षिणी अस्फुटताम् ॥

---

## १२. काको जम्बुकश्च ।

---

एकदा जम्बुकः कश्चि-
दाहारार्थं परिभ्रमन् ।
किमप्यप्राप्य घर्मार्त-
श्छायावृक्षमुपागमत् ॥ १ ॥

तदैव वायसः कश्चित्
कुतोऽप्यासादितं श्रमात् ।




मांसखण्डं मुखे धृत्वा
तमेव प्राप शाखिनम् ॥ २ ॥

तद्दृष्ट्वा भूरिमायः स
मांसं काकमुखे स्थितम् ।
अपहर्तुं मतिं कृत्वा
काकं सव्याजमस्तवीत् ॥ ३ ॥

सखे चिराय दृष्टोऽसि
धन्योऽस्मि तव दर्शनात् ।
दिनं सुदिनमेतन्मे
जन्माद्य सफलं मम ॥ ४ ॥

त्वादृशां दर्शनं नैव
विना पुण्येन लभ्यते ।
खगानां सार्वभौमोऽसि
कोन्वस्ति सदृशस्तव ॥ ५ ॥

अहो ते रूपलावण्य-
महो ते मधुरः स्वरः ।
रूपे गाने च नास्त्येव
जगत्यां त्वादृशः खगः ॥ ६ ॥

परुत्कदाचिदश्रौषं
तव गानं मनोहरम् ।
सकृत्तदेव शुश्रूषे
गीयतां सदयं सखे ॥ ७ ॥

श्रुत्वा तस्य स्तुतिं काकः
परं हर्षमुपागतः ।

गानाय वदनं व्यादात्
क्रव्यं च पातितं भुवि ॥ ८ ॥

तुष्टान्तरङ्गो गोमायु-
र्भक्षयित्वा तदामिषम् ।
यथागतं गतोऽन्यत्र
हसन् वायसमात्मना ॥ ९ ॥

इत्थं खलाश्छलस्तुत्या
वञ्चयन्ते जनान् भुवि ।
तज्जागृत यथा यूयं
न वञ्चयध्वे खलोक्तिभिः ॥ १० ॥

---

## १३. कदली ।

---

जगति विद्यमानास्तरुलतादिरूपा उद्भिदः केचित् फलपाकान्ताः केचिदतथाभूताश्च । तेषु फलपाकान्ता उद्भिदः 'ओषधयः' इत्युच्यन्ते । कदलीनां फलपाक एवान्तो भवति । अतस्ता ओषधयो भवन्ति । व्रीहि-यवादयोऽप्योषधिवर्गेऽन्तर्भवन्ति ।




कदल्यः फलदेषूद्भित्सु प्रशस्ताः क्षिप्रफलाश्च । वर्षेणैकेन ताः फलन्ति । कदलीप्रसव एकस्मिन् शतद्वयाधिकानि फलानि स्युः । सहस्रफला अपि केचिद्रम्भातरवः सन्ति ।

रम्भाफलानि नानाजातीयानि सन्ति, तेषां गुणो वर्ण आकारो रुचिश्च तत्तज्जातिभेदाद्भिद्यते । सामान्यतः कदलीफलानि त्वचि हारिद्राणि । कानिचिद्रक्त-

वर्णानि । अन्यानि कानिचिदन्तः पक्कान्यपि त्वचि हरितवर्णानि शलाटूनीव लक्ष्यन्ते । कानिचित् फलानि भक्ष्यमाणानि ज्वरमुत्पादयन्ति ।

कदल्यः प्राधान्येन भारतवर्षे सर्वत्र प्ररोहन्ति । आफ्रिकामेरिकाखण्डयोरपि बहुत्रोपलभ्यन्ते । कदल्याः सर्वोऽपि भाग उपयोगाय कल्पते । तस्याः पत्राणि भोजनामत्रत्वेनोपयुज्यन्ते । कदल्याः काण्डे स्थितानां त्वचां क्रमशः पाटनायामन्ते काण्डसार उपलभ्यते । तस्मात् काण्डसारादमेरिकाखण्डस्था जनाः सक्तून् सम्पाद्य तैरपूपान् राधयन्ति । एवं कदलीफलेभ्योऽपि शोषितेभ्योऽपूपोपयुक्तान् सक्तून् गृह्णन्ति यौरोपाः ।

कदलीद्रुमाणां मूलेऽङ्कुराः प्ररोहन्ति । ते स्थलान्तरे संरोप्यमाणाः पुष्टाङ्गाः फलानि वितरन्ति । केषाञ्चित् कदलीफलानामन्तर्भागे बीजानि विद्यन्ते । तान्यप्युप्यमानान्युद्भिद्यन्ते । कदल्यो दोहदं जलं च सर्वदापेक्षन्ते ।

---

# १४. हंसः ।

यद्यपि पक्षिणः प्रायेण नभसि डयन्ते तरुशाखासु च निवसन्ति तथापि हंसादयः केचित् पक्षिण सलिलवासिनः पृथिवीचारिणश्च दृश्यन्ते । ते बाहुल्येन पद्मिनीषु वसन्ति । मन्दं मन्दं भूमौ सञ्चरन्ति च । तेषां पक्षौ कोमलौ । अतस्ते सुदूरं डयितुं न पारयन्ति ।

हंसानां गरुतः श्वेताः, इतराण्यङ्गानि तु हारिद्राणि । केषाञ्चन हंसानां चञ्चवश्चरणाश्च लोहिताः । ते राजहंसा इति व्यपदिश्यन्ते । मल्लिकाक्षा अपि हंसभेदा एव । तेषां चञ्चवश्चरणाश्च धूम्रवर्णाः स्युः । हंसानां स्त्रियो हंस्य इति वरटा इति चाभिधीयन्ते ।

यथा विष्णोर्गरुडस्तथा ब्रह्मणो हंसो वाहनमिति पुराणेषु श्रूयते । कवयो हंसान् नीरक्षीरयोः पृथक्करणे शक्तानाहुः । उक्तं च—

हंसः शुक्लो बकः शुक्लः को भेदो बकहंसयोः ।
नीरक्षीरविभागे तु हंसो हंसो बको बकः ॥

ईदृशा हंसाः सम्प्रति कुत्रापि नोपलभ्यन्ते जगति। कविभिस्तावदेतादृशानां हंसानां रात्रौ सञ्चारः मानसाख्ये सरसि निवासश्च वर्ण्यते।

हंसा बिसाहारा इति काव्येषु वर्ण्यते। अथापि ते बाहुल्येन मत्स्यान् भक्षयन्ति। हंसाः पद्मसरसामलङ्कारभूता द्रष्टृणां चेतः समाकर्षन्ति।

---

## १५. न्यायस्थानम्।

---

कश्चिद्यवनः कदाचित् कस्यचिद् वणिजः पादुकायुगलमचोरयत्। स च वणिक् तमेव यवनं चोरं वितर्क्य न्यायस्थाने व्यजिज्ञपत्॥

न्यायाधिपश्च यथाविधि तं यवनं तस्य साक्षिणश्चानाय्य व्यवहारं विचारयामास। अथोभयपक्षीयाणां साक्षिणां वचनानि श्रुत्वा न्यायाधिपस्तस्मिन् यवने स्तेयापराधमारोपयितुमक्षमस्तं विससर्ज।

तं विसृज्य न्यायाधिपो गृहमगच्छत्। स यवनस्तत्र



साक्ष्यपञ्जर एव तिष्ठति । तदवलोक्य तत्पक्ष्यो न्यायवादी— 'अये, त्वं न्यायाधिपेन निरपराधो निर्णीतः, गच्छ' इत्यावेद्य कार्यान्तरेणान्यत्र चलितः। परिजनाश्च प्रायेण स्वं स्वं नियोगमनुष्ठातुं गताः ।

ततः किञ्चिदतीत्य तदीयो न्यायवादी भूयस्तत्रागतः साक्ष्यपञ्जर एव तिष्ठन्तं यवनमवलोक्याब्रवीत्— अरे, किमिदमाऽश्चर्यं गन्तुमनुमतोऽपि कस्मान्न गच्छसि ?

किमुन्मत्तोऽसि ? इति । यवनो ब्रूते— 'आर्य, इतस्तावदागम्यताम् । अस्ति किञ्चित् कर्णे कथनीयम्' इति ।

न्यायवादी तमुपसृत्य— 'किं तत् ? कथ्यताम्' इत्यपृच्छत् । यवन आह—पश्य, अत्र केचिद् वादिपक्षीयाः साक्षिणस्तिष्ठन्ति । तेषां निर्गमनात् पूर्वं नाहमितश्चालितुमर्हामि । न्यायवादी पृच्छति— कुत एतत् ? यवनो ब्रवीति— 'आर्य, मया चोरितं तत्पादुकायुगलं विलोकयन्तस्ते भूयोऽपि न्यायाधिपस्य सन्निधौ विज्ञाप्य मामपराधिनं कुर्युः । न्यायवादी साश्चर्यमप्राक्षीत्— अपि नाम त्वया चोरितं तत्पादुकायुगलम् ? यवनः प्रत्यवोचत्— आर्य, पश्य मे पादौ, तदेवेदं पादुकायुगलम् ।

## १६. उष्ट्रः ।

उष्ट्रो नाम कश्चिद्वक्रकायो जन्तुः । स गज इवात्यन्तं प्रांशुः । तस्यावयवास्तु तनीयांसः । तस्य चरणाः



कृशा दीर्घाश्च । कन्धरात्वायता कुटिला च । पुच्छो ह्रस्वः । उष्ट्राणां पृष्ठभाग एको गड्डुर्विद्यते । केषाञ्चित्तु द्वौ गड्डू स्तः । उष्ट्राः सर्वदोर्ध्वमेव पश्यन्ति ।

इत्थमुष्ट्रो यद्यपि विरूपाकृतिस्तथापि स मनुष्याणामत्यन्तोपकारी जन्तुः । गजो हि गुरुतरान् भारान् वोढुं क्षमते न तु शीघ्रं गन्तुम् । अश्वस्तावद्द्रुतं गन्तुं शक्नोति न त्वतिमहतो भारान् वोढुम् । उष्ट्रस्तु महा-

न्ति भाण्डानि वहन् द्रुततरं गच्छति ।

सन्ति खल्वारभादिदेशेषु समुद्रवदतिविशाला अदृश्यमानसीमानो मरुभूमयः । यत्र हि गृहाणां नदीनां कूपानां वृक्षाणां च कथापि न विद्यते । तत्रोष्ट्राः केवलं संचारार्थमुपयुज्यन्ते । उष्ट्राः खलु बहून् दिवसान् निराहाराः संचरितुं शक्ताः । प्रस्थानकाले च ते पञ्चषेभ्यो दिवसेभ्यः पर्याप्तं जलं पिबन्ति । अतः समुद्रेषु महानौका इव मरुभूभागेषु संचरतां जनानामुष्ट्रा एवाश्रयाः । अत एवारभीयाः सार्थवाहा उष्ट्रान् स्तुत्या गीत्या चोपगायन्ति ।

उष्ट्राः प्राधान्येन निम्बपत्राण्यश्नन्ति । कण्टकवृक्षेषु तेषां महती प्रीतिः । उष्ट्राणां शावकाः करभा इत्यभिधीयन्ते । अहो! पश्यत, करभकलभयोः कियदन्तरम् ।

## १७. काको हंसश्च ।

कदाचित् केनचिद्वणिजा विनोदार्थं कश्चित् काको मिष्टान्नदानेन पोषितः । स चाल्पीयसा कालेन परां

पुष्टिमुपगतः । तदा तस्य मनस्येवमुदभूत्—'अहं तावदतीव बलवानस्मि । मत्सदृशः पक्षिजातौ दुर्लभः । अतः किमित्यहं स्वातन्त्र्यमपहाय परपिण्डेन जीवामि' इति । एवं विचिन्तयन् स स्वामिनं परित्यज्य स्वच्छन्दं चचार ।

गच्छति काले स कदाचिदाहारमन्विष्यन् समुद्रतीरं गतः । तत्र पुलिने चरन्तं हंसमेकमवलोक्य तेन सह मैत्रीं कृत्वा सोऽपि तत्रत्ये कस्मिंश्चित्तरौ न्यवसत् । महता स्नेहेन तत्र वसतोस्तयोरेकस्मिन्दिने काको हंसस्य मन्दगामितामुपहसन् सव्याजमवोचत्— सखे, त्वं डयनेऽत्यन्तं निपुण इति मया बहुशः श्रुतम् । अतस्तव वेगितां द्रष्टुमिच्छामि । युगपदस्माद्देशात् प्रस्थितयोरावयोः कतरः प्रथमं समुद्रस्य पारं प्राप्नोतीति परीक्षावहे । तत्किमद्य डयितुं सज्जोऽसि? इति । हंसः 'तथा कुर्वः' इति तद्वचनमङ्गीचकार ।

ततस्तावुभावपि युगपत् प्रातिष्ठेताम् । हंसो यावत् पञ्चषाणि पदान्यगच्छत् तावत् काको द्रुतं डयमानः सुदूरं जगाम । परं काको द्रुतगत्या नितान्तं श्रान्तः समुद्रमध्ये पतित्वा पञ्चत्वं गतः । हंसस्तु मन्दं मन्दं

सञ्चरन् पदे पदे विश्राम्यन् कतिपयैरहोभिरम्भोधेः पारं प्रापत् । तस्मादहङ्कारो न युक्तः ।

---

## १८. खलः ।

---

खलः सर्षपमात्राणि
परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि
पश्यन्नपि न पश्यति ॥ १ ॥

तक्षकस्य विषं दन्तो
मक्षिकाया विषं शिरः ।
वृश्चिकस्य विषं पुच्छः
सर्वाङ्गं दुर्जने विषम् ॥ २ ॥

न प्रयत्नशतेनापि
दुर्जनः सुजनो भवेत् ।
किं मर्दितोऽपि कस्तूर्या
लशुनो याति सौरभम् ॥ ३ ॥

पाषाणो भिद्यते टङ्कै-
र्वज्रं वज्रेण भिद्यते ।
सर्पोऽपि भिद्यते मन्त्रै-
र्दुष्टात्मा नैव भिद्यते ॥ ४ ॥

खलानां कण्टकानां च
द्विविधैव प्रतिक्रिया ।
उपानन्मुखभङ्गो वा
दूरतो वा विसर्जनम् ॥ ५ ॥


---

## १९. गृहम् ।

---

यस्मिन् वयं वसामस्तद्गृहम् । राजानो हर्म्येषु निवसन्ति । हर्म्याणि नाम विशालान्युन्नतानि रमणीयानि च गृहाणि । अल्पीयांसि गृहाणि कुटीराणीत्युच्यन्ते । दरिद्राः कुटीरेषु निवसन्ति । ऋषीणां गृहाण्याश्रमाणि ।

गृहस्य मूलभागो गृहमूलमिति कथ्यते । गृहमूलं गृहस्य दृढावस्थानाय शिलाभिर्निबध्यते । तस्याधाधि-




को भागः क्लेदप्रतिरोधाय भूतलस्याधस्तात् सन्निवेश्यते । तस्माद्गृहस्याधोभागे वृष्टिजलं न प्रविशति । तेन गृहं सुदृढमवतिष्ठते ।

गृहमूलस्योपरिभागे समन्तात् पक्केष्टकाभिर्मृदा वा भित्तिः क्रियते । भित्तिः सुधया लिप्यते । सुधया लिप्तं गृहं सौधमित्युच्यते । क्वचिद्दारवाण्यपि कुड्यानि क्रियन्ते । कुटीराणां कुड्यानि भूयसा पर्णमयानि ।

भित्तिषु द्वाराणि वातायनानि च स्थाप्यन्ते । द्वाराण्यस्माकं निर्गमाय प्रवेशाय च क्रियन्ते । वातायनानि तु शुद्धस्य वायोः प्रकाशस्य च प्रवेशार्थं कल्प्यन्ते । वातायनरहितेषु गृहेषु वसन्तो जना विविधैरामयैः पीड्येरन् ।

भित्तिनिर्माणात् परं गृहस्योर्ध्वभागः पटलेनाच्छाद्यते । पटलं च कृशेष्टकामयं तृणमयं पर्णमयं वा भवति ।

गृहस्यान्तर्भागः पाककोष्ठो भोजनकोष्ठः शयनकोष्ठ इति तत्तत्सौकर्याय विभज्यते । केषु चिद्गृहेष्वेकद्वा उपरिभूमिकाः क्रियन्ते । अमेरिकाखण्डे केषुचिन्नगरेषु विंशत्या त्रिंशता वा भूमिकाभिर्घटितान्यभ्रङ्कषाणि हर्म्याणि निर्मीयन्ते ।

---

## २०. आहारः ।

---

अस्त्यस्माकमुदरे विलक्षणः कश्चिदग्निः, योऽन्तः स्थितः शरीरमखिलमुष्णयति । तस्य चाग्नेरिन्धनमा-

हारो भवति । आहार एव रक्तमांसरूपेण परिणतो देहस्य बलं जनयति ।

सोऽयमाहारः सात्विको राजसस्तामस इति त्रिविधः। सात्विको नाम रस्यः स्निग्धो मधुरः शुचिश्च । स चायुः सत्वं बलं बुद्धिं सुखमारोग्यं च पुष्णाति ।

राजसो नामातिकटुरत्यम्लोऽत्युष्णस्तीक्ष्णो रूक्षो विदाही च । स च शौर्यमहङ्कारं दार्ढ्यं कामं क्रोधं शोकं चोत्पादयति ।

तामसस्तु यातयामो गतरसः पूतिः पर्युषितो जुगुप्सितश्च । अयमेव राक्षसाहारो नाम । अयमाहारो मनुष्याणां मदं मात्सर्यमभिमानमहङ्कारं दम्भं च तनोति ।

यथा हि दुष्टो वायुः अशुद्धं जलं च नानाविधानामामयानां प्रभवो भवति तथैव कुत्सित आहारोऽपि । तस्मात् सात्विक एवाहारः प्रशस्ततमः । सैनिकास्तु राजसमप्याहारं गृह्णन्तो न दुष्यन्ति । तामस आहारस्तु सर्वथैव त्याज्यः ।

वयं शाल्यन्नमश्नीमः । यौरोपास्तु गोधूमं बाहुल्ये-

नोपयुञ्जते । शाल्यन्नापेक्षया मुद्गो माष आढको गोधूमश्च बलकारी भवति ।

अत्यधिकमत्यल्पं च न भोक्तव्यम् । अत्यल्पभोजनमग्निं ज्वलयितुं न पर्याप्नोति । अत्यधिकं भोजनमजीर्यत् अग्निं मन्दीकरोति । तस्मान्मितमेव भोजनं हितकारि भवति । यावता भुक्तेन क्षुन्निवृत्तिर्जायेत तावदेव भोक्तव्यम् । तदेव मितभोजनं नाम । केचित्स्वपेक्षितादधिकं भुञ्जते । बुद्धिमन्तस्तु न भोजनार्थं जीवन्ति किन्तु जीवनार्थं भुञ्जते ।

---

## २१. समुद्रः प्रवहणं च ।

समुद्रो नामातिविस्तीर्णोऽदृश्यमानपारः सुतरामगाधोऽम्भसां राशिः । स च क्वचित् क्वचित् क्रोशत्रयमगाधो वर्तते । समुद्रेषु वात्योत्पादितास्तरङ्गाः सततमुद्र्वन्ति । अतस्ते दुरवगाहाः ।

समुद्रेषु नैकविधानि यादांसि प्रतिवसन्ति । भूमौ



निवसतां प्राणिनां मध्ये गजा एव गरिष्ठा बलिष्ठाश्च। अब्धौ तु ततोऽपि महत्तरा बलवत्तराश्च तिमिङ्गिलाख्या जलचराः सन्ति। ते तदा तदा जलस्योपरि प्लवमानाः सांयात्रिकाणां द्वीपभ्रममुत्पादयन्ति। शश्वच्च वालप्रहारेण ते महानौका अपि मज्जयन्ति।

नानाविधा महान्तो मत्स्याः सागरे विद्यन्ते। धीवराः प्लवैः सागरं प्रविश्य जालैस्तान् बध्नन्ति। मूल्यवन्ति

रत्नानि प्रवालानि मुक्ताफलानि च समुद्रेषु जायन्ते । अत एव तेषां रत्नाकर इति संज्ञा ।

वयं नदीर्नौकाभिस्तरामः । पारावारास्तु कल्लोलैराकुला नौभिस्तर्तुमशक्याः । अतस्तत्र प्रवहणैः सञ्चरन्ते जनाः । प्रवहणेषु कानिचिद्वायुना नीयमानानि कानिचिद्बाष्पशक्त्या चाल्यमानानि च । यथैव स्थले बाष्पशकटानि तथैव जले बाष्पप्रवहणान्युपयुज्यन्ते ।

वायुना प्रेर्यमाणं प्रवहणं कदाचिद्वात्ययाभिहतं मज्जेदपि । बाष्पप्रवहणेषु सञ्चरतां जनानां नैतादृशं महद्भयं विद्यते । बाष्पप्रवहणान्येकया होरया विंशत्यधिकान् क्रोशान् प्रयान्ति । अतो बाष्पप्रवहणेषु प्रयान्तो जनाः सुदूराण्यपि द्वीपान्तराणि कतिपयैरेव दिवसैः प्राप्तुं शक्नुवन्ति ।

## २२. शकटम् ।

अत्रैकं शकटं व्रजति । इदं वृषभशकटम् । यदश्वैरुह्यते तदश्वशकटम् । यद्बाष्पशक्त्या गच्छति तद्बाष्प-



शकटम् । तस्यैव धूमशकटमिति नामान्तरम् । केषुचिद्देशेषु श्वानोऽपि शकटानि वहन्ति ।

शकटेऽस्मिन् द्वौ वृषभौ नियोजितौ । केषुचिच्छकटेष्वेकोऽपि वृषभो नियुज्यते । पश्य, शकटस्य द्वे चक्रे स्तः । चक्रं परितः स्थितो भागः नेमिरित्युच्यते । चक्रयोर्मध्ये मण्डलाकारेण दृश्यमानो भागश्चक्रनाभिः । नेमेश्चक्रनाभेश्चान्तराले द्वादशाराः प्रोताः सन्ति । प्रा-

येण चक्राणि द्वादशाराणि क्रियन्ते । चक्रद्वयस्य नाभिरन्ध्रयोस्तिर्यगक्षदण्डः सङ्घटितः । तस्मिन्नक्षदण्डे शकटस्य भारस्तिष्ठति ।

वृष्टेरातपस्य च वारणाय शकटं कटमयेन पटलेनाच्छाद्यते । तेन शकटं जनानां सञ्चाराय योग्यं भवति । बहवो जनाः शकटैर्गतागतं कुर्वन्ति । भारवन्ति भाण्डान्यपि शकटमारोप्य देशाद्देशं नयन्ति ।

चित्रमवलोकय । तत्र शकटस्याग्रभागे स्थितो बालः शाकटिकः । स रथ्यायां शकटं नयति । यदा स शकटं शीघ्रं नेतुमिच्छति तदा कशया वृषौ ताडयति । तदा तौ द्रुतं गच्छतः । यदा शकटं स्थापयितुमिच्छति तदा स नासारज्ज्वा वृषौ पश्चादाकर्षति । तदा तौ तिष्ठतः ।

अयं शाकटिकः पूर्वमतीव दरिद्र आसीत् । तदा स कस्यचिद्धनिनो गृहे कर्म कुर्वन् प्रत्यहं केवलमाणकचतुष्कं वेतनमलभत । अथापि स बुद्धिमान् । यतः स लब्धस्यार्धं स्वजीविकायै व्ययीकुर्वन्नपरमर्धं रक्षति स्म । तथा रक्षितं च तद्धनं वर्षद्वयेन शतं रूप्यकाण्यभूवन् । पश्चादसौ बालस्तेन धनेनेदं शकटमिमौ वृषभौ चाक्री-

णात् । सम्प्रत्ययं प्रतिदिनं द्वित्राणि रूप्यकाण्यर्जयन् सुखेन जीविकां निर्वर्तयति ।

---

## २३. दैवं पुरुषकारश्च ।

---

दैवं फलति सर्वत्र
    न विद्या न च पौरुषम् ।
पाषाणस्य कुतो विद्या
    येन देवत्वमागतः ॥ १ ॥

हरिणापि हरेणापि
    ब्रह्मणापि सुरैरपि ।
ललाटलिखिता रेखा
    परिमार्ष्टुं न शक्यते ॥ २ ॥

तथापि तावत्—

न दैवमिति सञ्चिन्त्य
    त्यजेदुद्योगमात्मनः ।

अनुद्योगेन कस्तैलं
तिलेभ्यः प्राप्तुमर्हति ॥ ३ ॥

यथा ह्येकेन चक्रेण
न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण
विना दैवं न सिध्यति ॥ ४ ॥

उद्यमेनैव सिध्यन्ति
कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य
प्रविशन्ति मुखे मृगाः ॥ ५ ॥

विहाय पौरुषं यो हि
दैवमेवावलम्बते ।
प्रासादसिंहवत्तस्य
मूर्ध्नि तिष्ठन्ति वायसाः ॥ ६ ॥

नात्युच्चशिखरो मेरु-
र्नातिनीचं रसातलम् ।
व्यवसायद्वितीयानां
नाप्यपारो महोदधिः ॥ ७ ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥


---

## २४. त्रिशङ्कुः ।

---

आसीत् पूर्वं सूर्यवंशे त्रिशङ्कुर्नाम महाराजः, यः स्वबाहुबलेन सर्वान् शत्रूनुन्मूल्य सागरपर्यन्तां पृथिवीं शशास । धर्मेण धरां परिपालयतः सर्वत्र विजयिनस्तस्य मनसि 'अनेन मर्त्यदेहेन सहैव स्वर्ग आरोढव्यः' इति मनोरथः समजनि । ततः स तदर्थकं यज्ञं कर्तुमुद्युक्तः कुलगुरुं तपोनिधिं वसिष्ठमुपेत्य पौरोहित्याय वव्रे । वसिष्ठस्तु तस्य मनोरथमपथे प्रवृत्तमवलोक्य तदर्थनां प्रत्याचख्यौ ।

ततः स राजा वसिष्ठस्य शतं पुत्रानुपेत्य सप्रश्रयमेकैकशस्तमेवार्थं ययाचे । तेऽपि तद्वचनं नाभ्यनन्दन् ।



तदा रोषाविष्टो राजा परुषवचनैस्तान् भृशमनिन्दत् । तदाकर्ण्य ते क्रुद्धास्तं 'चण्डालो भव' इत्यशपन् ।

ततश्चण्डालतां गतोऽपि त्रिशङ्कुः कथञ्चिदात्मनो मनोरथं साधयितुमिच्छन् वसिष्ठस्पर्धिनं महातपस्विनं विश्वामित्रं शरणमगच्छत् । विश्वामित्रस्तं वृत्तान्तमाकर्ण्य चण्डालस्यापि तस्य यज्ञं कर्तुं मतिं व्यधात् । अवदच्च— 'राजन्, मा भैषीः । अहं त्वां याजयामि ।

स्वर्गं तव हस्तगतं जानीहि ।' इति ।

ततः स यज्ञं निश्चित्य ब्राह्मणानामन्त्रयितुं सर्वतः शिष्यान् प्राहिणोत् । अकरोच्च यज्ञाय महान्तं सम्भारम् । क्लृप्ते च दिवसे ब्राह्मणैः सह विश्वामित्रः सुदुष्करं सप्ततन्तुं समारभत । देवास्तु स्वाहाकारैराहूयमाना अपि न समागताः ।

तदनु विश्वामित्रः क्रुद्धो यज्ञं परित्यज्य स्वस्य तपसो बलेन त्रिशङ्कुं स्वर्गमारोपयामास । इन्द्रादयो दिवौकसश्च सदेहं चण्डालं स्वर्गमारोहन्तं वीक्ष्य झटित्यधः पातयामासुः । ततस्त्रिशङ्कुः 'त्रायस्व मां त्रायस्व माम्' इत्याक्रोशन्नपतत् । अधः पतंश्च सः 'त्रिशङ्को तिष्ठ' इत्युक्तवता विश्वामित्रेण भूम्याकाशयोर्मध्ये स्थापितः ।

अतो यः शक्यमप्यनुचितं कर्म करोति स उभयतो भ्रष्टस्त्रिशङ्कुरिवान्तराले स्थास्यति ।

# २५. रामो भीमः श्यामश्च ।

कस्मिंश्चिद्ग्रहारे रामो भीमः श्यामश्चेति त्रयः सहपाठिनोऽवर्तन्त । तेषां रामः सुबुद्धिः, भीमो मन्दबुद्धिः, श्यामो दुष्टबुद्धिश्चासीत् । रामः स्वीयं दैनन्दिनं पाठं काले पठन्नुद्यमशाली बभूव । भीमः पठितुकामोऽप्यप्रगल्भ आसीत् । श्यामस्तु न जातु पठति । किन्तु सहाध्यायिन उपाध्यायं च निन्दन् कालं नयति । एकदा श्यामो भीमस्य गृहमगच्छत् । तत्र तयोरयं सँल्लापः प्रवृत्तः—

भीमः— सखे श्याम, उपाध्यायो रामे नितरां स्निह्यति । आवां च भृशं दण्डयति । तत्रापि त्वां पदे पदे ताडयति । अतीव शोचनीयमिदम् ।

श्यामः— दुष्ट उपाध्यायः । तेन स मां तथा ताडयति ।

भीमः— सखे, न युक्तमुक्तं त्वया । रामः सम्यक् पाठान् पठति । उपाध्यायस्य प्रश्नानां युक्ततरा-

ण्युत्तराणि च ददाति । सुलभ उपाध्यायानामुद्यमशीलेषु च्छात्रेषु पक्षपातः ।

श्यामः— किमावां न च्छात्रौ ?

भीमः— सखे, आवामपि च्छात्रावेव । किन्तु न पाठान् पठावः । नाप्युपाध्यायस्य प्रश्नानामुत्तराणि दद्वः ।

श्यामः— उपाध्याय आवां न सम्यक् पाठयति ।

भीमः— सखे, तदप्यसङ्गतम् । एकदैवोपाध्यायो राममावां च पाठयति, न तु रामं पृथक्तया । तस्मात् त्वदुक्तमयुक्तमेव । मन्ये, पठने समादरणीयो यः कोऽप्युपायः स्यात्, येन रामः सम्यक् पठति ।

श्यामः— भद्र, मन्ये, स कामपि यक्षिणीमाराधयति, यस्याः साह्येन स सम्यगधीते ।

भीमः— गच्छावस्तस्यैवान्तिकम् । तमेव पृच्छावः ।

(अथ भीमः श्यामश्च रामस्य गृहं गच्छतः)

भीमः— सखे राम, त्वया प्रत्यहं पाठाः सम्यक् पठ्य-

न्ते । उपाध्यायस्य प्रश्नानां सम्यगुत्तराणि च दीयन्ते । तत् कथम् ? अप्यस्ति कश्चिदुपायः पठने समादरणीयः ?

रामः— सौम्य, नात्र विशेषतः कश्चिदुपायोऽस्ति । अहं तावदन्वहमध्यापयन्तमुपाध्यायं श्रद्धया शृणोमि । श्रुतं च गृहं गत्वा रात्रौ चिन्तयामि । चिन्तितं च प्रातरुत्थायावधारयामि । यदि तत्र सन्देह उत्पद्यते तर्हि सहाध्यायिन उपाध्यायं वा पृष्ट्वा तं विषयमवगच्छामि । तेनाहमुपाध्यायस्य प्रश्नानामुत्तराणि दातुं शक्नोमि । यद्येवं कुर्युस्तर्हि सर्वेऽपि च्छात्राः शक्ता भवेयुः । उद्यम एव विद्यार्थिनां परमो बन्धुः ।

भीमस्तन्निशम्य तदा प्रभृति तथैवाकरोत् । कतिपयैरेव दिवसैः सोऽपि राम इव बुद्धिमान् बालको बभूव । श्यामस्तु न केवलं दुष्टबुद्धिः किन्त्वलसश्चासीत् । न स कदाप्युपाध्यायस्य वचनानि श्रद्धत्ते न च गृहे जातु पुस्तकमप्युद्घाटयति । स च परेषां प्रतारणेऽत्यन्तं निपुणः ।

एकस्मिन् दिवसे ते त्रयोऽपि वयस्याः क्वापि

रथ्यायाः परिसरे क्रीडन्तो बभूवुः । तदा श्यामो रामं वञ्चयितुमिच्छन् ब्रवीति—

श्यामः— सखे राम, त्वं कर्मशूर इत्युपाध्यायो वदति । अस्तु तावत् । अपि त्वं मया चक्षुषी निमील्य क्रियमाणं किमपि कर्म चक्षुषी उन्मील्य करिष्यसि ? किं ब्रवीषि ?

रामः— (सामोदम् ) सखे, कः सन्देहः ? करिष्यामि ।

श्यामः— सत्यम् ?

रामः— सत्यमेव ।

श्यामः— सखे भीम, त्वं साक्षी ।

भीमः— आम् , अहमस्मि साक्षी ।

ततः श्यामो रथ्याया रजःपुञ्जमादाय स्वचक्षुषी निमील्य तदुपरि प्राक्षिपत् । अब्रवीच्च रामं— 'सखे, यन्मया चक्षुषी निमील्य कृतं तत् त्वया चक्षुषी उन्मील्य क्रियताम्' इति । रामस्तद्दृष्ट्वा गृहं प्रति पलायत । तस्माद् दुष्टैः सह शपथो न कर्तव्यः ।

———




## २६. गृध्रो मार्जारश्च ।

---

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे जराजीर्णो गलितनखनयनः जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित्किञ्चिदुद्धृत्य

तस्मै ददाति। तेनासौ जीवति। शावकानां च रक्षणं करोति।

अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः। तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तं— कोऽयमायाति? दीर्घकर्णो गृध्रमवलोक्य स्वयं सभयमाह— हा हतोऽस्मि। अधुनास्य सन्निधाने पलायितुमक्षमः। तद्यथा भवितव्यं तद्भवतु। तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि।

इत्यालोच्योपसृत्याब्रवीत्—आर्य, त्वामभिवन्दे। गृध्रोऽवदत्— कस्त्वम्? सोऽवदत्-मार्जारोऽहम्। गृध्रो ब्रूते— दूरमपसर, नोचेद्धन्तव्योऽसि मया। मार्जारोऽवदत्— श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः। गृध्रो ब्रूते— ब्रूहि, किमर्थमागतोऽसि? सोऽवदत्— अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि। यूयं धर्मज्ञानरता इति विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यः धर्मं श्रोतुमिहागतः। भवन्तश्चैतादृशा धर्मज्ञाः, यन्मामतिथिं हन्तुमुद्यताः।

मयापि धर्मशास्त्राण्यधीतानि । गृहस्थधर्मश्चैषः--यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्य एव ।

गृध्रोऽवदत्— मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहमेवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च— मया धर्मशास्त्राणि श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम् । परस्परं विवदमानानामपि धर्मशास्त्राणां 'अहिंसा परमो धर्मः' इत्यत्रैकमत्यम् । एवं विश्वासमुत्पाद्य मार्जारस्तत्कोटरे न्यवसत् ।

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । येषामपत्यानि खादितानि तैः शोकार्तैः विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत् परिज्ञाय मार्जारः कोटरान्निस्सृत्य बहिः पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरमनेनैव जरद्गवेनास्माकं शावकाः खादिताः इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः ।




## २७. त्रयो धूर्ताः ।

एकदा ब्राह्मणः कश्चि-
यज्ञं कर्तुं समुद्यतः ।
क्वचित् कञ्चिदजं क्रीत्वा
स्कन्धे धृत्वा गृहं ययौ ॥ १ ॥

तं व्रजन्तं द्विजं वीक्ष्य
त्रयो धूर्ताः पथि स्थिताः ।
चिराद्बुभुक्षया खिन्नाः
परस्परमवादिषुः ॥ २ ॥

अजोऽयं मांसलो हन्त
केनोपायेन लभ्यते ।
बुभुक्षाशान्तिरस्माक-
मनेन स्यान्न संशयः ॥ ३ ॥

कर्णे जपन्तस्तदनु
किञ्चिदालोच्य ते मिथः ।
विप्रादजं जिहीर्षन्तो
भिन्नस्थानगताः स्थिताः ॥ ४ ॥

अथाह प्रथमो धूर्तो
विप्र, किं क्रियते त्वया ।
किमर्थं श्वानमशुचिं
स्कन्धेनादाय गच्छसि ॥ ५ ॥

स विप्रस्तस्य वचन-
मनादृत्य पुरो गतः ।
किञ्चिद्दूरं गते तस्मिन्
द्वितीयस्तमवोचत ॥ ६ ॥

अहो ब्रह्मन्, किमाश्चर्यं
किमनेन शुना तव ।

कथमेतत्करोषि त्वं
कर्मात्यन्तविगर्हितम् ॥ ७ ॥

तच्छ्रुत्वा जातसन्देहो
यावदग्रे व्रजत्यसौ ।
तावत् तृतीयः कितवः
समुपेत्याब्रवीदिदम् ॥ ८ ॥

ब्रह्मन् , यज्ञोपवीतं त्वं
श्वानं च वहसे कथम् ।
नूनं व्याधो न विप्रस्त्वं
हंस्यनेन शुना मृगान् ॥ ९ ॥

तदाकर्ण्य द्विजो दध्यौ
नैवायं यज्ञियः पशुः ।
किन्तु श्वैवं न सन्देहः
सर्वे पश्यन्ति किं मृषा ॥ १० ॥

अद्धाहं विप्रलब्धोऽस्मि
कयाचिद्धूतमायया ।
फलमेतदसन्देहं
मम प्रारब्धकर्मणः ॥ ११ ॥

इति मत्वा स तं छागं
त्यक्त्वा स्नात्वा गृहं ययौ ।
धूर्ताश्च नीत्वा तं हत्वा
सानन्दं समभक्षयन् ॥ १२ ॥

---

## २८. हिमालयः ।

---

अस्ति भारतखण्डस्योत्तरस्यां दिशि हिमालयो नाम महीधरः । यः पूर्वापरौ तोयनिधीवगाह्य स्थितो भारतवर्षस्योदीचीं सीमानमापादयति । यस्य च दैर्घ्यं ८०० क्रोशाः । विस्तारस्तु अवरतः ७५ क्रोशाः परमतः १५० क्रोशाश्च भवन्ति । दैर्घ्येण वैशाल्येन औन्नत्येन च हिमालयोऽयं सर्वान् पर्वतानतिशेते । न केवलं भारतखण्डे किन्तु समग्रेऽपि भूमण्डले नास्त्येतादृशोऽन्यः पर्वतः । अतोऽयं शैलराज इति स्थाने व्यपदिश्यते ।

हिमालयोऽयं क्रमश उन्नतोन्नताभिस्तिसृभिः श्रेणीभिः सङ्घटितः । तत्र, प्रथमा श्रेणी ३००० पदोन्नता

महाद्रुमैराकीर्णा अरण्यानी भवति । अथाप्यस्या ऊर्ध्व-सानुषु जनाः प्रतिवसन्ति । विविधानि धान्यानि चात्र प्ररोहन्ति । द्वितीया श्रेणी १८००० पदोन्नता वेणु-तुल्यैः दीर्घैस्तृणैः हिंस्रैर्मृगैश्चाभिव्याप्ता । नात्र जना निवसन्ति ।

तृतीया श्रेणी परश्शतैरभ्रङ्कषैः शृङ्गैः संशोभते । तेषु पञ्चचत्वारिंशच्छृङ्गाण्यत्यन्तमुन्नतानि । तेषां तुङ्ग-तमं गौरीशङ्कराख्यं शृङ्गं २९००२ पदान्युच्छ्रयते । नास्यां श्रेण्यां वृक्षाः प्ररोहन्ति । नापि जन्तवो जीवन्ति । किन्त्वेषा श्रेणी शिलाघनैः हिमसङ्घातैरावृता वर्तते । अत एवास्य पर्वतस्य हिमालयव्यपदेशः । ये च खलु हिमसङ्घाता निदाघकाले विलीयमानाः वृष्टिमन्तरेणा-पि स्रोतस्विनीषु स्रोतांस्यभिवर्धयन्ति ।

हिमालयोऽयं पूर्वपश्चिमप्रान्तयोः क्रमेण ह्रस्वह्रस्वो भवति । विद्यन्ते च तत्र तिबेतदेशप्रापका दुर्गमाः पन्था-नः । यद्ययं सर्वत्राप्यैकरूप्येण तुङ्गोऽभविष्यत् तर्हि तद्बाह्या जनास्तया दिशा भारतवर्षं प्रवेष्टुं नाशक्ष्यन् ।

हिमाचलादस्माद्गङ्गाप्रभृतयो नद्यः सिन्धुप्रभृतयो

नदाश्चोद्भूय भारतभूमौ प्रवहन्ति । यो हि वायुना नीयमानान् मेघान् जलकणांश्च निरुन्धन् नानाविधानां नदीनां प्रभवतामृच्छति । भारतवर्षस्य सम्पत्समृद्धौ हिमालय एव मुख्यो हेतुः। अत एवैनं देवतात्मानमाकलयन्ति भारतीयाः ।

---

## २९. साधवः ।

---

उपकारिषु यः साधुः
साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः
स साधुः सद्भिरुच्यते ॥

यथा चित्तं तथा वाचो
यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च
साधूनामेकरूपता ॥

नालिकेरसमाकारा
दृश्यन्ते भुवि सज्जनाः ।
अन्ये बदरिकाकारा
बहिरेव मनोहराः ॥ ३ ॥

श्लोकस्तु श्लोकतां याति
यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र
यत्र तिष्ठन्त्यसाधवः ॥ ४ ॥

अपेक्षन्ते न च स्नेहं
न पात्रं न दशान्तरम् ।
सदा लोकहिते युक्ता
रत्नदीपा इवोत्तमाः ॥ ५ ॥

परपरिवादे मूकः
परनारीदर्शनेऽपि जात्यन्धः ।
पङ्गुः परधनहरणे
स जयति लोके महापुरुषः ॥ ६ ॥

---



**His Highness Sri Chithira Thirunal Maharaja of Travancore.**

# ३०. अनन्तपुरमहाराजः ।

अयमनन्तशयनापरनामधेयस्य अनन्तपुरस्याधीशः श्रीमांश्चित्रर्क्षजो रामवर्ममहाराजः । अयं १९१२तमे वर्षे नवम्बरमासस्य सप्तमे दिवसे श्रीमत्याः 'सेतुपार्वतीभायि' नाम्न्याः कनीयस्या राज्याः पुत्रत्वेनावतीर्णः । जननकाल एवायं राज्याधिकारी युवराज आसीत् । क्रमेण चाभिवृद्धिं गतोऽयं कुमारः श्रीमता मूलकमहाराजेन प्रेरितः कैरलीमाङ्गलीं गैर्वाणीं चाभ्यास्थत् । बाल्य एवास्य असाधारणी बुद्धिशक्तिरभूत् ।

अस्य मातुलः श्रीमान् मूलर्क्षजो रामवर्ममहाराजः १९२४ तमे वर्षे अगोस्तुमासस्य सप्तमे दिने दिवमारोहत् । तदनु सप्तम्बरमासस्य प्रथमेऽहनि शुभे मुहूर्ते युवराजोऽयं प्रजाभिरानन्दविवशाभिः सिंहासनमधिरोपितः । परन्त्वयमिदानीमप्राप्तवयस्को राज्यधुरां वोढुं न शक्नोति । अतः सम्प्रत्यस्य मातृष्वसा श्रीमती 'सेतुलक्ष्मीभायि' नाम्नी ज्यायसी राज्ञी राजपदे स्थिता राज्यं करोति ।

यदायं कुमारः पञ्चदशे वर्षे पदमकरोत् तदास्योपनयनमहोत्सवः क्षात्रेण विधिना साघोषं निर्वर्तितः। उपनीतश्च भूय एव महाराज्ञ्याः प्रोत्साहेन शिक्षकाग्रेसरैः साधु शिक्षितोऽयं युवराजः गणिते चरित्रे भूमिशास्त्रे प्रकृतिशास्त्रे न्यायशास्त्रे च प्रावीण्यमविन्दत। अयमश्वारोहणेऽत्यन्तं निपुणः। कन्दुकादिक्रीडास्वपि नितरां कुशलः। सौजन्यसौशील्यादीनां गुणानामप्ययमाकरः।

महोदयोऽयं युवराजः १९२८ तमे वर्षे मात्रा साकमुत्तरभारतवर्षं गतः कालिघट्ट-काशी-डल्ही-बुम्बाप्रभृतीनि नगराण्यद्राक्षीत्। तदात्वे तत्तद्देशे महतां जनानां परिचयं सम्पाद्य तेषामभिनन्दनस्य पात्रतामयासीत्।

पूर्णाष्टादशवर्षोऽयं राज्याधिकारं लप्स्यते। लब्धराज्यश्चायं महाराजः परम्पराधिगतं धर्ममनुपालयन् कालोचितान् परिष्कारानातन्वन् प्रजाश्च धर्मतः परिरक्षन् भगवतः श्रीमदनन्तशायिनः कृपया सर्वत्र विजयी भूयादित्याशास्महे।

# ३१. धीरश्चोरः ।

---

पुरा धारानगरे भुक्कुण्डो नाम कश्चिद् धीरश्चोरो बभूव । स कस्याञ्चिद्रात्रौ कस्यचिद्वणिजः सदनं प्रविश्य महार्घाणि भूषणानि मुष्णन् गृहं प्रति न्यवर्तत । गच्छंश्च पथि दैवादारक्षकैर्लक्षितो गृहीतश्च ।

अन्येद्युः प्रातरेव तं निगडितपादं ते राजान्तिकं निन्युः । राजा च तमवलोक्य— 'कोऽयम्' इत्यारक्षकानप्राक्षीत् । आरक्षका आहुः— 'देव, कुम्भीलकोऽयमतीतायां रात्रौ मणिकारवीथ्यां कस्यचिद्वणिजो वसतिं खातपातमार्गेण प्रविश्य भूषणानि चोरयित्वा गच्छन्नस्माभिर्गृहीत आनीतश्च । अतः परं देवः प्रमाणम्' इति ।

तेषां वचः श्रुत्वा राजा कुम्भीलकमपृच्छत्— रे, अपि सत्यं यदेते कथयन्ति ? भुक्कुण्डस्तावदात्मनः कृत्यं निह्नोतुमशक्नुवन् क्षणं तूष्णीमास्त । भूयः सदृष्टिक्षेपं पृष्टः स 'देव, अहमतीव दरिद्रोऽस्मि । चौर्येणैव मया जीवनं क्रियते । क्षम्यताम्' इत्यवदत् ।

तच्छ्रुत्वा कुपितो राजा तस्य द्वीपान्तरप्रापणमेव दण्डं विदधौ।

भुक्कुण्डश्च पुत्रदारादीनां वियोगाद्वित्रस्तो द्वीपान्तरगमनान्मरणमेव वरं मत्वा राजानं भर्त्सयमानो निर्भीकः प्राह—

भट्टिर्नष्टो भारविः सोऽपि नष्टः
भिक्षुर्नष्टो भीमसेनोऽपि नष्टः।
भुक्कुण्डोऽहं भूपतिस्त्वं हि राजन्
भभावल्यामन्तकः सन्निविष्टः॥

तदाकर्ण्य कविवत्सलो राजा—'भो भुक्कुण्ड, दण्डार्होऽपि त्वं सुकविरसीति मया क्षम्यसे। यदीतः परमीदृशं कर्म करिष्यसि तदा ते मरणान्तमेव दण्डं विदध्याम्' इत्युक्त्वा तं विससर्ज। भुक्कुण्डोऽपि तदा प्रभृति त्यक्तचौर्यः राज्ञः प्रीतेः पात्रीभूतः सपुत्रकलत्रः सुखमुवास।

'किं किं न साधयति कल्पलतेव विद्या'।

---

## ३२. चाटुश्लोकाः ।

अगजाननपद्मार्कं
 गजाननमहर्निशम् ।
अनेकदन्तं भक्ताना-
 मेकदन्तमुपास्महे ॥ १ ॥

आदिमध्यान्तरहितं
 दशाहीनं पुरातनम् ।
अद्वितीयमहं वन्दे
 मद्वस्त्रसदृशं हरिम् ॥ २ ॥

वन्दे वाञ्छितलाभाय
 कर्म किं तन्न कथ्यते ।
किं दम्पतिमिति ब्रूया-
 मुताहो दम्पती इति ॥ ३ ॥

सदा वक्रः सदा क्रूरः
 सदा मानधनापहः ।
कन्याराशिस्थितो नित्यं
 जामाता दशमो ग्रहः ॥ ४ ॥

प्रातर्द्यूतप्रसङ्गेन
मध्याह्ने स्त्रीप्रसङ्गतः ।
रात्रौ चौर्यप्रसङ्गेन
कालो गच्छति धीमताम् ॥ ५ ॥

पिनाकफणिबालेन्दुभस्ममन्दाकिनीयुता ।
पवर्गरचिता मूर्तिरपवर्गप्रदायिनी ॥

---

## ३३. वाराणसी ।

---

सन्ति खलु भारतवर्षे नानादिक्षु बहूनि तीर्थक्षेत्राणि । तेषु अयोध्या मथुरा माया काशी काञ्ची अवन्तिका पुरी द्वारावतीत्येतानि प्रधानभूतानि । तत्रापि वाराणसी पुराणेष्वतिशयेन वर्ण्यमानमनुत्तमं पुण्यक्षेत्रम् । सैव काशीत्युच्यते । सैषा भारतवर्षस्य पूर्वोत्तरभागेऽवतिष्ठते । यस्याः परिसरे पुण्यसलिला भागीरथी प्रवहति ।

गङ्गायां स्नानेन जनाः पूतात्मानो मुक्तिं प्राप्नुवन्तीति वेदाः पुराणानि चोद्घोषयन्ति । अतो भारतवर्षस्य




सर्वाभ्यो दिग्भ्यः सर्वेभ्यो देशेभ्यश्च स्त्रियः पुरुषा बाला वृद्धाः शूद्रा ब्राह्मणाश्च प्रतिवर्षं गङ्गास्नानार्थं काशीं गच्छन्ति । गत्वा च तत्र नद्यां स्नात्वा भगवन्तं विश्वनाथमर्चयन्ति ।

गङ्गायास्तीरे निबद्धाः सुन्दराः सुविशालाश्च सोपानपथाः सततं जनैराकीर्णा उपलभ्यन्ते । अपि चैकत्र वैष्णवाः अन्यत्र शैवाः अपरत्र मतान्तरीयाश्च स्वस्व-

चिह्नानि धरन्तः कुशहस्ताः पञ्चपात्रपाणयो जपन्तो ध्यायन्तश्च सोपानपथानलङ्कुर्वन्ति । अन्यत्र केचिदुद्बाहवः पादाग्रेण तिष्ठन्त उद्यन्तं सूर्यमेकाग्रेण मनसा ध्यायन्ति । अपरे केचन कृतप्राणायामाः पशुपतिं चिन्तयन्ति । इत्थमेषा वाराणसी सत्कर्मणामायतनं धर्माणामावासभूमिश्च दृश्यते ।

वारणस्येषा बहुभूमिकैरत्युच्छ्रितैर्मन्दिरैः संशोभते। विशेषतश्च नद्यास्तीरे विद्यमाना गृहपङ्क्तिः महतीं शोभां बिभर्ति । नगरमिदं पुरा हाटकमयं बभूवेति श्रूयते । इदानीं तु केवलं शिलामयं दृश्यते । गङ्गा च स्नानबद्धानां पुरतः परस्सहस्रैर्बाष्पप्रवहणैः महानौकाभिश्चाभिव्याप्ता विलसति । काशीनगरस्य सुषमा नदीगतं प्रवहणमारूढैर्निरीक्षणीया ।

काशीक्षेत्रमिदं भारतीयविद्यायाः कुलभवनमिवाभाति । यतो ह्यत्र वेदाः पुराणानि शास्त्राणि च यथा पुरमद्यत्वेऽपि सश्रद्धमधीयन्ते जनैः । अत्रत्यं विद्यापीठमधिरूढो जनः समस्तविद्यापारङ्गतत्वेन परिगण्यते ।

---



॥ जगद्गुरुः श्रीशङ्कराचार्यः ॥

## ३४. श्रीशङ्कराचार्यः ।

जगद्गुरुः श्रीशङ्कराचार्यः केरलेषु चूर्णीनद्यास्तटे विद्यमानं कालटिनामकं जनपदं स्वजन्मना व्यभूषयत् । तस्य पिता परमभागवतः शिवगुरुः, माता च धर्मशीला आर्याम्बा । सोऽयमाचार्यः ७८८ तमे क्रिस्त्वब्दे नन्दनवत्सरे वैशाखमासे पञ्चम्यां तिथौ पुनर्वसुनक्षत्रेऽभिजिन्मुहूर्ते भुवमवातरत् ।

स यदा पञ्चहायनोऽभूत् तदा तस्य पिता शिवगुरुर्दैवदुर्विपाकात् कालधर्मं गतः । आर्याम्बा च पत्युर्वियोगेन खिन्नापि सुतस्य भविकमनुध्यायन्ती तस्थौ । बालकस्य च विद्याग्रहणे निरतिशयं पाटवं वीक्ष्य सा तस्मिन्नेव वत्सरे बन्धुभिस्तस्योपनयनं कारयामास । अनुपदमेव गुरुकुलमुपनीतः स बालको द्वित्रैरेव वर्षैः सर्वान् वेदान् वेदाङ्गानि विविधा भाषाश्चाध्यगीष्ट ।

अधीत्य च सर्वाणि शास्त्राण्यष्टहायनः कुमारो जगदिदं मृगतृष्णिकायास्तुल्यमाकलयन् सन्यासग्रहणे मतिं बबन्ध । तदेकपुत्रा माता च तस्येच्छां नान्वमन्यत ।

अथापि स कथञ्चित् तां सान्त्वयन्नन्ततस्तस्या सम्मतिमवाप्य गृहात् प्रस्थितः सन्यासस्य दातारं गुरुमन्विष्यन् वाराणसीमगच्छत्। तत्र च गोविन्दाचार्यं नाम महासंयमिनं शरणमुपेत्य तस्मात् सन्यासमधिगत्य तस्यैव सविधे वेदान्तमध्यैत।

गोविन्दाचार्यश्च तं कञ्चित्कालमध्यापयन् तस्य प्रतिभाशक्त्या विस्मितस्तं साक्षाच्चराचरगुरोः शङ्करस्यावतारममन्यत। आदिशच्चैनं पाखण्डैरभिभूयमानस्य सनातनस्य सद्धर्मस्य परिपालनाय।

शिरसा वहंश्च गुरोराज्ञां श्रीशङ्कराचार्यः सर्वत्र पुण्यक्षेत्रेषु सञ्चरन्नुपनिषद्भिरुपादिश्यमानमद्वैतं लोके प्रचारयामास। आवर्जयामास च मधुरमधुरया वाग्धोरण्या जनतायाश्चेतांसि। खण्डयामास च बौद्धानां जैनानां च मतानि। स्थापयामास च सर्वत्रास्तिकानां सम्मतं सद्धर्मम्। रचयामास च हृद्यया शैल्या सूत्रभाष्यादिकान् परश्शतान् ग्रन्थान्। अध्यापयामास च नानादिग्भ्यः समागतान् परस्सहस्रान् शिष्यान्। तेषु प्रधानभूताः—पद्मपादाचार्यः सुरेश्वराचार्यः हस्तामलकाचार्यः तोटकाचार्य इति चत्वारः शिष्याः।

तदनु श्रीशङ्कराचार्यो महता यत्नेनोज्जीवितस्य सद्धर्मस्य स्थिरप्रतिष्ठार्थं बदर्यां जगन्नाथे काञ्च्यां द्वारकायां च मठान् प्रतिष्ठाप्य तत्र धर्मप्रवचनाय शिष्यान् न्ययुङ्क्त । स्वयं च महीशूरदेशान्तर्गते शृङ्गगिरौ प्रतिष्ठापितं मठमाधिष्ठाय पाठप्रवचनादिकं कुर्वन्नास्त । यद्यप्ययं योगीश्वरो विष्णुशिवयोरभेदमतिष्ठत तथाप्यस्य भगवति शिवे महती भक्तिरासीत् । अत एव तदनुगामिनो जनाः प्रायेण शैवा एवोपलभ्यन्ते ।

श्रीशङ्कराचार्योऽयमल्पीयसैव कालेनासेतुहिमाचलं स्वीयं नित्यशुद्धं यशो विस्तार्य द्वात्रिंशे वयसि केदारनाथक्षेत्रे समाधिमास्थाय परं धाम प्रपेदे । तेन प्रतिष्ठापितो मतधर्मश्चाद्य यावत् समुल्लसति सर्वत्र भारते वर्षे । तत्राप्ययं दक्षिणापथे सविशेषः प्रचरति ; यत्र हि परमकारुणिकाः श्रीकामकोटिपीठाधिपतयः श्रीशृङ्गगिरिमठाधिपतयश्च धर्मसंस्थापनार्थाय देशाद्देशं व्रजन्तः शिष्यानुपदिशन्तः अधर्ममुच्चाटयन्तश्चाद्वैतधर्ममहर्निशं श्रद्धया परिपालयन्ति ।

---

## ३५. सुभाषितावलिः ।

द्राक्षा म्लानमुखी जाता
शर्करा चाश्मतां गता ।
सुभाषितरसस्याग्रे
सुधा भीता दिवं गता ॥ १ ॥

गुणानर्चन्ति जन्तूनां
न जातिं केवलां क्वचित् ।
स्फाटिकं भाजनं भग्नं
काकिण्यापि न गृह्यते ॥ २ ॥

किं कुलेन विशालेन
शीलमेवात्र कारणम् ।
भवन्ति सुतरां स्फीताः
सुक्षेत्रे कण्टकिद्रुमाः ॥ ३ ॥

सर्वत्र गुणवान् देशे
चकास्ति प्रथतेतराम् ।
मणिर्मूर्ध्नि गले बाहौ
पादपीठेऽपि शोभते ॥ ४ ॥

गुणैरुत्तुङ्गतां याति
नोच्चैरासनसंस्थितः ।
प्रासादशिखरस्थोऽपि
काकः किं गरुडायते ॥ ५ ॥

आरोप्यते शिला शैले
यत्नेन महता यथा ।
निपात्यते क्षणेनाध-
स्तथात्मा गुणदोषयोः ॥ ६ ॥

गुणेषु क्रियतां यत्नः
किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभि-
र्गावः क्षीरविवर्जिताः ॥ ७ ॥

गुणानामन्तरं प्राय-
स्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं
घ्राणं वेत्ति न लोचनम् ॥ ८ ॥

मान्या एव हि मान्यानां
मानं कुर्वन्ति नेतरे ।

शम्भुर्बिभर्ति मूर्ध्नेन्दुं
स्वर्भानुस्तं जिघृक्षति ॥ ९ ॥

निर्गुणेष्वपि सत्वेषु
दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां
चन्द्रश्चण्डालवेश्मनः ॥ १० ॥

किमत्र चित्रं यत्सन्तः
परानुग्रहतत्पराः ।
न हि स्वदेहशैत्याय
जायन्ते चन्दनद्रुमाः ॥ ११ ॥

बलवानपि निस्तेजाः
कस्य नाभिभवास्पदम् ।
निश्शङ्कं दीयते लोकैः
पश्य भस्मचये पदम् ॥ १२ ॥

दुर्जनस्य विशिष्टत्वं
परोपद्रवकारणम् ।
उपोषितस्य व्याघ्रस्य
पारणं पशुमारणम् ॥ १३ ॥

खलः करोति दुर्वृत्तं
नूनं फलति साधुषु ।
दशाननोऽहरत्सीतां
बन्धनं तु महोदधेः ॥ १४ ॥

निन्दां यः कुरुते साधो-
स्तेन स्वं दूषयत्यसौ ।
खे भूतिं यस्त्यजेदुच्चै-
र्मूर्ध्नि तस्यैव सा पतेत् ॥ १५ ॥

सद्भिः सम्बोध्यमानोऽपि
दुरात्मा पापपूरुषः ।
घृष्यमाण इवाङ्गारो
निर्मलत्वं न गच्छति ॥ १६ ॥

अहो दुर्जनसंसर्गा-
न्मानहानिः पदे पदे ।
पावको लोहसङ्गेन
मुद्गरैरभिहन्यते ॥ १७ ॥

महाजनस्य संसर्गः
कस्य नोन्नतिकारकः ।

रथ्याम्बु जाह्नवीसङ्गा-
त्रिदशैरभिवन्द्यते ॥ १८ ॥

स्थिरा शैली गुणवतां
खलबुध्या न बाध्यते ।
रत्नदीपस्य हि शिखा
वात्ययापि न शाम्यते ॥ १९ ॥

उपकर्तुं यथा स्वल्पः
समर्थो न तथा महान् ।
प्रायः कूपस्तृषां हन्ति
सततं न तु वारिधिः ॥ २० ॥

निराश्रया न शोभन्ते
पण्डिता वनिता लताः ।
अनर्घमपि माणिक्यं
हेमाश्रयमपेक्षते ॥ २१ ॥

विद्वानेव विजानाति
विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति
गुर्वीं प्रसववेदनाम् ॥ २२ ॥

यस्य नास्ति स्वयं प्रज्ञा
शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य
दर्पणः किं करिष्यति ॥ २३ ॥

यस्य नास्ति विवेकस्तु
केवलं यो बहुश्रुतः ।
न स जानाति शास्त्रार्थान्
दर्वी पाकरसानिव ॥ २४ ॥

लक्ष्मीवन्तो न जानन्ति
प्रायेण परवेदनाम् ।
शेषे धराभराक्रान्ते
शेते नारायणः सुखम् ॥ २५ ॥

गुणवन्तः क्लिश्यन्ते
प्रायेण भवन्ति निर्गुणाः सुखिनः ।
बन्धनमायान्ति शुका
यथेष्टसञ्चारिणः काकाः ॥ २६ ॥

अतिपरिचयादवज्ञा
भवति विशिष्टेऽपि वस्तुनि प्रायः ।

लोकः प्रयागवासी
　　कूपस्नानं सदाचरति ॥ २७ ॥

साम्नैव यत्र सिद्धि-
　　र्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया
　　शाम्यति कोऽर्थः पटोलेन ॥ २८ ॥

नीचो वदति न कुरुते
　　न वदति सुजनः करोत्येव ।
शरदि न वर्षति गर्जति
　　वर्षति वर्षासु निस्वनो मेघः ॥ २९ ॥

सुजनो न याति वैरं
　　परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः
　　सुरभयति मुखं कुठारस्य ॥ ३० ॥

वनेऽपि सिंहा गजमांसभक्षिणो
　　बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता
　　न नीचकर्माणि समाश्रयन्ति ॥ ३१ ॥

वरं दरिद्रः श्रुतिशास्त्रपारगो
न चापि मूर्खो बहुरत्नसंयुतः ।
सुलोचना जीर्णपटापि शोभते
न नेत्रहीना कनकैरलङ्कृता ॥ ३२ ॥

बोधितोऽपि बहुसूक्तिविस्तरैः
किं खलो जगति सज्जनो भवेत् ।
स्नापितोऽपि बहुशो नदीजलै-
र्गर्दभः किमु हयो भवेत् क्वचित् ? ॥

सम्पूर्णकुम्भो न करोति शब्द-
मर्धो घटो घोषमुपैति नित्यम् ।
विद्वान् कुलीनो न करोति गर्व-
मल्पो जनो जल्पति साट्टहासम् ॥

क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति ॥

शब

(अव्यय, समासप्र

A New and
with very

*Approved By the Madras, Mysore and Cochin Text-Book Committees.*

DC Library
*00004466*
T38 S79

Review in the Mysore Maharajah's Sanskrit-College Magazine :—

पण्डितवरैः P. S. अनन्तनारायणशास्त्रिभिर्विरचिताऽसौ शब्दमञ्जरी क्रमशः सामान्य कष्टतर कष्टतम शब्दरूपाभ्यासविषये बालकानामतीवानुकूल्यं परिपोषयति। अस्यां चाधोभागे प्रायशः सर्वत्रोपपादिता व्याकरणांशादिविशेषविषयाः आधुनिकानां गीर्वाणभाषाभ्यासकुतुकिनां विद्यार्थिनामतीव साहाय्यकारिण उत्साहजनकाश्च। व्याख्याताश्चास्या अन्त्यभागे तिङन्तसमासप्रकरणादिकाः तत्तदंशेषु विद्यार्थिना सुमुखं तत्तद्ज्ञानादिकमुत्पादयन्ति येन च भाषान्तरीयतादृशविषया अपि सुविशदमनायासेन तैर्विज्ञेया भवन्ति। अस्यां च विवृताः सर्वेऽपि शब्दाः यत्किंचिद्वैलक्षण्यमापन्नाः सर्वास्वपि विभक्तिषु प्रायेण प्रदर्शिता इत्ययमप्यंशोऽध्येतॄणामत्यानुकूल्याधायकः। तस्मादेवं सौकर्यापादनपुरस्सरं भाषाज्ञानोपयोगिनीयं शब्दमञ्जरी गीर्वाणभाषाध्येतृभिः सादरं यद्यभ्यस्यते तदा ते सर्वेऽपि समधिगतमनोरथाः सम्पद्यन्त इतीयं सर्वविश्वसनीया।

Neatly got up on Good Glazed Paper Price 0-6-0
Do. Ordinary Edition „ 0-5-0

R. SUBRAHMANYA VADHYAR,
Book-Seller & Publisher,
KALPATHY-PALGHAT.

A REFORMED SERIES OF SANSKRIT READERS

# READER II.

By Pandit K. L. V. Sastri.

# ॥ संस्कृताद्वितीयादर्शः ॥



PUBLISHED BY

**R. SUBRAHMANYA VADHYAR,**
BOOKSELLER & PUBLISHER,
KALPATHI–PALGHAT.

1928

(All Rights Reserved.)

[मूल्यं ८ आणकाः

T38
S79

Indic Digital Archive Foundation
gpura.org